८श्वेतवचायाञ्च स्त्री मेदि० ङीप् ९गङ्गायां १०रेणुकायां स्त्री धरणिः ङीप्। [स्वर्णयूथिकायां शब्दर०।

**हैमा(मी)** स्त्री हेम तद्वर्णोऽस्त्यस्य अच् वा ङीप्।

**हैयङ्गवीन** न० ह्योगोदोहाद्भवम् ह्यस्+गो+ख नि०। १नवनीते रत्नमा०। पूर्वदिनदुग्धोद्भवे २घृते च अमरः।

**हैरिक** पु० हि—र हेरः तत्र प्रसृतः ठक्। चौरे धरणिः।

**हैहय** पु० पश्चिमस्थे देशविशेषे वृ०स० कूर्मविभाग २१६८ पृ० दृश्यम् तेषां राजा अण्। २हैहयेश्वरे कार्त्तवीर्य्ये हेमच० पृषो० हैहेय तत्रार्थे शब्दर०।

**हो** अव्य० ह्वे—डो नि०। १सम्बोधने २आह्वाने च मेदि०।

**होड** गतौ अनादरे च भ्वा० आ० सक० सेट् ऋदित् चङि न ह्रस्वः। होडते अजुहोडत्।

**होड** पु० होड—अच् हुड—अच् वा। १समुद्रगामिनौकाभेदे (डुङि) त्रिका० २चौरचिह्ने च मिता०।

**होतृ** पु० हु-तृच्। १ऋग्वेदाभिज्ञे अमरः। २होमकर्त्तरि त्रि० स्त्रियां ङीप्। "या हविर्या च होत्री" शकुन्तला

**होत्र** न० हु—ष्ट्रन्। १होमे हेमच०। २हविषि घृतादौ च त्रिका० ३स्तुतौ स्त्री टाप्।

**होत्रीय** न० होत्राय हितम् होतुरिदं वा छ। १हविर्गृहे हेमच०। २होतृसम्बन्धिनि त्रि०।

**होम** पु० हु—मन्। देवतोद्देशेन वह्नौ मन्त्रद्वारा घृतादित्यागरूपे हवने नित्यं गृहस्थकर्त्तव्येषु पञ्चसु यज्ञेषु मध्ये २देवयज्ञे अमरः। ३आत्मीयविप्रपाणौ आत्मीयाप्यभागस्य मन्त्रेण दाने च आ० त०।

**होमकुण्ड** पुंन० होमार्थं कुण्डम्। होमार्थे कुण्डे त्रिका०

**होमधान्य** न० होमोपयुक्तं धान्यम्। १तिले २यवे च राजनि०।

**होमधूम** पु० होमजः धूमः। होमार्थाग्निजाते धूमे हेमच०

**होमभस्मन्** न० होमजं भस्म। हुतद्रव्यजाते भस्मनि हेमच०

**होमाग्नि** पु० ६त०। यज्ञियाग्नौ हेमच०।

**होमि** पु० हु-मि सुट् च। १अग्नौ २घृते च मेदि० ३जले शब्दर०। ४चित्रकवृक्षे।

**होमिन्** पु० होमोऽस्त्यस्य इनि। होमकर्त्तरि। [राजनि०

**होम्य** त्रि० होमाय हितम् यत्। होमोपयुक्ते घृतादौ

**होरा** स्त्री हु-रन्। ज्योतिषोक्ते १लग्ने २राश्यर्द्धभागे ३होराज्ञापकशास्त्रभेदे ४रेखायाञ्च मेदि०। "विषमर्क्षेषु प्रथमा होराः सूर्य्यस्य रोचिषः। द्वितीयाः शशिनो युग्मे व्यत्ययाद्गणयेत् सदा" ज्यो० त०। "चतुर्विंशतिवेलाभिरहोरात्रं प्रचक्षते। पश्चिमाद्रवि-रात्रादि होराणां विद्यते क्रमः" वह्निपु०।

**होलक** पु० हु-क्विप् जुहोति लक-अच् कर्म०। "अर्द्धपक्वैः शमीधान्यैस्तृणभृष्टैश्च होलकः" इत्युक्ते तृणादिना अर्द्धपक्वे शमीधान्ये "होलकोऽल्पानिलो मेदःकफ-दोषश्रमापहः। भवेद्यो होलको यस्य स च तत्तद्-गुणो भवेत्" भावप्र०।

**होलाक** पु० स्वेदविशेषार्थव्यापारभेदे चरकः तत्र दोलाक इत्यत्र होलाक पाठान्तरम्।

**होलाका** स्त्री हु-क्विप् तं लाति ला-क संज्ञायां कन्। १वसन्तोत्सवभेदे उपचारात् तत्काले फाल्गुनपौर्ण-मास्याञ्च। पृषो० होली होलिका होलकाऽप्यत्र। होलाकाविधिश्च आचारप्राप्त इति माधवादयः। पुराणादिप्रसिद्धः शास्त्रमूलोऽयम् आचार इति हेमाद्रि-निर्णयसिन्धुप्रभृतयः। तद्विधिकालौ नि०सि० उक्तौ यथा "फाल्गुनपौर्णमासी होलिका सा च सायाह्नव्यापिनी ग्राह्या 'सायाह्ने होलिकां कुर्य्यात् पूर्वाह्ने क्रीडनं गवामिति" वचनादिति निर्णयामृते उक्तम्। ज्योतिर्नि-बन्धे तु "प्रतिपद्भूतभद्रासु यार्ऽचिता होलिका दिवा। संवत्सरञ्च तद्राष्ट्रं पुरं दहति साद्भुतम्। प्रदोषव्यापिनी ग्राह्या पूर्णिमा फाल्गुनी सदा। तस्यां भद्रामुखं त्यक्त्वा पूज्या होला निशामुखे" इति नारदवचनात् प्रदोष-व्यापिनीत्युक्तम्। हेमाद्रौ मदनरत्ने च भविष्ये "तस्यां निशागमे पार्थ! संरक्ष्याः शिशवो गृहे। गोमयेनोप-लिप्ते च सचतुष्के गृहाङ्गणे" इत्यादिना तत्रैव तद्वि-धानाच्च। तेनेयं पूर्वविद्धा "श्रावणी दुर्गनवमी दूर्वा चैव हुताशनी। पूर्वविद्धैव कर्त्तव्या शिवरात्रिर्बलेर्दिनम्" इति बृहद्यमब्रह्मवैवर्त्तोक्तेश्च। दिनद्वये प्रदोषव्याप्तौ परैव पूर्वदिने भद्रासत्त्वात् तत्र च होलिकानिषेधात् तदुक्तं निर्णयामृते मदनरत्ने च पुराणसमुच्चये "भ-द्रायां दीपिता होली राष्ट्रभङ्गं करोति वै। नगरस्य च नैवेष्टा तस्मात् तां परिवर्जयेत्"। तथा "भद्रायां द्वे न कर्त्तव्ये श्रावणी फाल्गुनी तथा। श्रावणी नृपतिं हन्ति ग्रामं दहति फाल्गुनी"। तथा "दिनार्धात् पर-तोऽपि स्यात् फाल्गुनी पूर्णिमा यदि। रात्रौ भद्रा-वसाने तु होलिका दीप्यते तदा" इति। यदा तु पूर्वदिने चतुर्दशी प्रदो० व्यापिनी परदिने च क्षयवशात् सायाह्नात् प्रागेव पूर्णिमा समाप्यते तदा पूर्वदिने संपूर्ण